श्रीः॥ गणेशायनमस्तस्मै निर्विघ्नसिद्धिहेतवे। आदिगौरीसमुद्भूततेजसेशाम्भवायच॥१॥ महामायेतियागीताचिन्मयी मुनिसत्तमैः। करोतुवाग्विलासं मे जिह्वायांसासरस्वती॥२॥ श्रीसृष्टेः सूत्रधारस्य प्रसादाद्विश्वकर्मणः। प्रासादमंडनं ब्रूतेसूत्रधारेषु मंडनः॥३॥ गृहेषु यो विधिः प्रोक्तो विनिवेशप्रवेशने। सएव विदुषाकार्यो देवतायतने ध्रुवम्॥४॥ हिमाद्रेरुत्तरे पार्श्वेचारुरासकमंडपे। प्रावनं शङ्करस्थानं तत्रसर्वैः शिवोऽर्चितः॥५॥ प्रासादाकारपूजाभिर्देवदैत्यादिभिः क्रमात्। चतुर्दशसमुत्पन्नाः प्रासादानांचजातयः॥६॥ नागरद्राविडाश्चैव भूमिजालतिनस्तथा। सावधारविमानाद्यानागराः पुष्पकांतिकाः॥७॥ मिश्रकैः तिलकैः सौम्यैरष्टौजातिषु चोत्तमाः। सर्वदेवेषुकर्तव्याः शिवस्यापिविशेषतः॥८॥ प्रासादानांच सर्वेषांजायतेदेशभेदतः। चतुर्दशप्रवर्तन्तेइमालोकानुसारतः॥९॥ लक्ष्यलक्षणतोऽस्यस्यात्गुरुमार्गानुसारतः। प्रासादभवनादीनांसर्वंज्ञानमवाप्यते॥१०॥ शुभलग्नेशुभनक्षत्रेपंचग्रहबलान्विते। मासर्तुवार्षादिनिर्विघ्नसमयोक्तिते॥११॥ सर्वादिक्षुप्लवाहींशाप्राग्उदक्सैकरज्जवः। भुवंपरीक्ष्यसिंचेत्तपंचगव्येनकोविदः॥१२॥ मणिनास्वर्णरौप्येणविद्रुमेनफलेनवा। चतुःषष्टिपदैर्वास्तुंलिखेद्वापिशतांशकैः॥१३॥ विष्टेनवाहतैःशुद्धैःततोवास्तुंसमर्चयेत्। पूर्वोक्तेन विधानेनबलिपुष्पादिपूजनैः॥१४॥ इंद्रोवह्निःपितृपतिर्नैर्ऋतोवरुणोमरुत्। कुबेरईशुःपतयःपूर्वादीनांदिशांक्रमात्॥१५॥ दिक्पालाःक्षेत्रपालाश्चगणेशश्चऋषिकातथा। एतेषांविधिवत्पूजांकृत्वाकर्मसमारभेत्॥१६॥ पूजनंविधिवत्कृत्वासूत्रधारेणपूजयेत्।

वस्त्रालंकारसंयुक्तं तोषयेच्च धनादिभिः ॥२७॥ धनुर्मीनस्थिते सूर्ये गुरौ शुक्रेऽस्तगे विधौ। वैधृतेव्यतिपातेभेदग्धे
नेष्टं कदाचन ॥२८॥ कन्यादित्रित्रिगे सूर्ये द्वारं पूर्वादिपुत्यलेत्। स्रष्ट्या वत्समुखं तत्र स्वामिनो हानिकृद्व्रजेत् ॥२९॥ आयो
व्ययर्क्षमंशस्य भित्तिवाह्ये सुरालये। ध्वजायोदेबनक्षत्रे व्ययांशौ प्रथमौ शुभौ ॥३०॥ केषांच मरुतां गेहे वृषसिंहाजाः
शुभाः। हीनआयव्ययश्रेष्ठाः पिशाचस्तु समोऽधिकः ॥३१॥ देवतानां गृहे चित्रसीमाष्टांगचतुष्कयं। नवांगं नाडिवेधा
दिस्थापकामय्यो र्मिथः ॥३२॥ आयादिचिन्तनं भूमिर्लक्षणं वास्तुमंडलं। मासनक्षत्रलग्नादि चिन्तनं पूर्वशास्त्रतः ॥३३॥
राचो दिक्साधनं कुर्यात् दीपसूत्रध्रुवैक्यतः। समे भूमिप्रदेशेतु शंकुना दिवसेऽथवा ॥३४॥ नागवास्तुं समालोक्य कुर्यात् खातविधिं
सुधीः। पाषाणान्तं जलान्तं वा ततः कूर्मं निवेशयेत् ॥३५॥ अर्धांगुलो भवेत् कूर्म एकहस्ते सुरालये। अर्धांगुला ततो वृद्धिः
कार्या तिथिकरावधि ॥३६॥ एकत्रिंशत्करांतंच तदूर्ध्वं वृद्धिरिष्यते। ततोऽर्धापि शतार्धान्तं कूर्मो मन्वंगुलान्मितः ॥३७॥ चतु
र्थांशाधिकोज्येष्ठः कनिष्ठो हीनयोगतः। सौवर्णो रौप्यजो वापि स्थाप्यः पंचामृतेन सः ॥३८॥ ईशानादग्निकोणांतशि
लाः स्थाप्याः प्रदक्षिणाः। मध्येकूर्मशिलापश्चाद्गीतवादित्रमंगलैः ॥३९॥ बलिदानंच नैवेद्यं विविधान्नघृतप्लुतं। देवताभ्यः
सुधीर्दद्यात् कूर्मन्यासे शिलासुच ॥४०॥ सूत्रारंभो गृहादीनामुत्तरायणकर्मणि। ब्राह्मेपुष्येमृगे मैत्रे वौद्धे वासववारुणे ॥४१॥

शिलान्यासस्तु रोहिण्यां श्रवणे हस्तपुष्ययोः। मृगशीर्षे चरे चंद्रे त्रितये शुभः ॥४२॥ नद्यां सिद्धाश्रमे तीर्थे पुरे ग्रामेच
गह्वरे। वापीवाटीतडागादिस्थानेकार्यं सुरालये ॥४३॥ स्वशक्त्या काष्ठमृत्लेष्टि शिलाधातुजरत्नजं। देवतायतनंकुर्यात् धर्मार्थकाम
मोक्षदं ॥४४॥ देवानां स्थापनं पूजा पापहृद्दूषणादिकं। धर्मे वृद्धे भवेदर्थकाममोक्षास्ततः परं ॥४५॥ कोटिघ्नचरणे पुण्यं मृ
न्मये दशमंगुणं। ऐष्टके शतकोटिघ्नं शैलेऽनन्तं फलंगृहे ॥४६॥ कूर्मसंस्थापने द्वारे पद्माख्यायांच पौरुषे। घटे ध्वजे प्रतिष्ठा
यां एवं पुण्यादसप्तकं ॥४७॥ भूम्यारंभे तथा कूर्मे शिलायां सूत्रपातने। पुरेद्वारेच्छ्रये स्तंभे पदे पद्मशिलासुच ॥४८॥ मुक
नासेच पुरुषे घंटायां कलशे तथा। ध्वजोच्छ्रयेच कुर्वीत शांतिकानिचतुर्दश ॥४९॥ एकहस्तादिप्रासादो यावद्धस्तशतार्धकं।
प्रमाणं कुम्भकेमूलनासिकेभित्तिवाह्यतः ॥५०॥ कुम्भादिस्थावराणांच निर्गमः समसूत्रतः। पीठस्य निर्गमोवाह्ये तथैव
छाद्यकस्यच ॥५१॥ त्रिपंचसप्तनवभिः कालनाभिं विभाजयेत्। प्रासादे अंगसंख्याता वारिमार्गास्तरास्थिताः ॥५२॥ फास
नाकर्णतुल्यातु भद्रंतु द्विगुणं मतं। सामान्योऽयं विधिस्तुल्यो हस्तांगुलविनिर्गमः ॥५३॥ इतिश्रीसूत्रधारमंडनविरचित
प्रासादमंडने वास्तुशास्त्रे मिश्रकलक्षणो प्रथमोऽध्यायः ॥१॥ "प्रासादानामधिष्ठानंजगती सा निगद्यते। यथा सिंहा
सनं राज्ञः प्रासादस्य तथैवसा ॥१॥ चतुरस्रायताष्टास्रा वृत्तावृत्तायतावथा। जगती पंचधा प्रोक्ता प्रासादस्यानुरूपतः ॥२॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

प्रासाद पृथुमाना च द्वि त्रि उरणा च चतुर्उरणा। क्रमात् पंचउरणा प्रोक्ता ज्येष्ठा मध्या कनीयसी ॥३॥ कन्यसे कन्यतां ज्येष्ठे ज्येष्ठा मध्येच मध्यमा। प्रासादे जगतीकार्या स्वरुपालक्षणान्विता ॥४॥ दस सप्त उरणा ख्याता जिने पर्यायसंस्थिता। द्वारिका यांच कर्त्तव्या तथैव पुरुषत्रये ॥५॥ मंडपानुक्रमेणैव सप्तादशेन साधितः। द्वि उरणा वायता कार्या सहस्रायतनावधि ॥६॥ त्रि छेदे कभ्रमसंयुक्ता ज्येष्ठा मध्या कनिष्ठिका। उच्छ्रयस्यत्रिभागेन भ्रमणीं समुच्छ्रयः ॥७॥ चतुःकोशैस्तथा सूर्यकोशैर्विंशतिकोशकैः। अष्टाविंशति षट्त्रिंशत्कोशैः स्युः पंचफालना ॥८॥ प्रासादे द्वादशकरा मे विंशे द्वाविंशतिः कराः। द्वात्रिंशतिश्च तथांशो भूतांशोद्वा शतार्धकैः ॥९॥ एक हस्ते करैरंशा द्वा सार्धांशा चतुःकरे। सूर्यजैने शतार्धान्ते क्रमात् द्वि त्रियुगांशकैः ॥१०॥ तदुच्छ्रायं भजेत् प्राज्ञस्तुष्टाविंशतिभिः पदैः। विपदी जाड्यकुम्भश्च द्विपरं करणकं तथा ॥११॥ पद्मपंचसमायुक्ता त्रिपटा सप्तपत्तिका। द्विपदं पुरकं कुर्यात् सप्तभागं चकुम्भकं ॥१२॥ कलशस्त्रिपदः प्रोक्तो भागेनान्तरपत्रकं। कपोतालीत्रिभागश्च पुष्पकरणो युगांशकः ॥१३॥ पुष्पकाजाड्यकुम्भश्च निर्गमश्चाष्टभिः पदैः। कोणेषु दिक्पालाः प्राच्यादिषु प्रदक्षिणाः ॥१४॥ प्राकारो मंडितः कार्यो चतुर्भिर्द्वारमंडपैः। सकपोतैर्जलनिष्कासैः सोपानैस्तोरणादिभिः ॥१५॥ मंडपाग्रे प्रतोल्यग्रे सोपानं शुंडिकाग्रतः। तोरणं कारयेत्तस्य पदांपादानुसारतः ॥१६॥ तोरणस्योभयस्तम्भविलग्नगर्भमानतः। भित्तिगर्भप्रमाणेन तयोर्मध्येऽवकाशभवेत् ॥१७॥ वेदिकापीठरूपैश्च

शोभाभिर्बहुभिर्युतं। विचित्रं तोरणं कुर्यात् दोलादेवस्य तत्रच ॥१८॥ प्रासादद्वारहस्थाने कर्णीया चतुष्किका। एकद्वि त्रिचतुःपंचरससप्तपदान्तरे ॥१९॥ आयामेन नवांशेतु पंचषट्सप्तभागिका। गुह्यनाभिस्तनान्तं वा त्रिविधोवाह्नोदयः ॥२०॥ पादंजानुकटिं यावत् अर्चायावौष्ठनस्यच दृक्। वृषस्य विश्वभागान्ते सूर्ये सौम्यं स्तनान्तकं ॥२१॥ जिनाग्रे संवसरणं शुकाग्रे गूढमंडपं। गूढस्याग्रे चतुष्कार्धं तदग्रे नृत्यमंडपं ॥२२॥ द्विसप्तत्या द्विवासौ वा चतुर्विंशतितोऽपिवा। जिनालयैश्चतुर्दिक्षु सहितं जिनमन्दिरं ॥२३॥ मंडपाद्भ्रमसूत्रेण वामदक्षिणयोर्दिशोः। अष्टापदं प्रकर्त्तव्यं त्रिशालाचावलाणकं ॥२४॥ अपरे रथशालाच मठयाम्ये प्रतिष्ठिता। उत्तरे रथरन्ध्रंच प्रोक्तं श्रीविश्वकर्मणा ॥२५॥ इति प्रासादजगती ॥ अग्रतः पृष्ठतश्चैव वामदक्षिणयोर्दिशोः। प्रासादे कारयेदन्यं नाभिवेधविवर्जितं ॥२६॥ लिंगाग्रे च प्रकर्त्तव्या अर्चारूपेण देवताः। प्रभानष्टान भोगाय तथा तारादिवाङ्कुरे ॥२७॥ शिवस्याग्रे शिवं कुर्यात् ब्रह्मणश्च ब्रह्मणोऽग्रतः। विष्णोरग्रे भवेद्विष्णु जिनेजैनो रवौरविः ॥२८॥ ब्रह्मविष्णोरेकतामिर्द्वाभ्यां दोषो न विद्यते। शिवस्याग्रेऽन्यदेवस्य दृष्टिवेधे महद्भयं ॥२९॥ प्रसिद्धराजमार्गस्य प्राक्परस्यान्तरेऽपिवा। स्थापयेदन्यदेवस्य तत्रदोषो न विद्यते ॥३०॥ शिवस्यानोदृक्कं गूढमार्गे चंडमुखे क्षिपेत्। दृष्टं नोलंघयेत्तत्र हन्ति पुरंपुरे कृतं ॥३१॥ एकाचंड्यामुखे सप्ततिस्रोदग्द्वाङ्गिनायकं। चतस्रो वासुदेवस्य शिवस्यार्धप्रदक्षिणं ॥३२॥ अग्रतो जिनदेवस्य तिस्रोच

मंत्रार्चनादिकं। कुमीनदर्शी यैतत्पृष्ठं सम्मुखे द्वारलंघनं ॥३३॥ पूर्वापरमुखे द्वारे प्रणालं शुभमुत्तरे। इति शास्त्रविचारोक्त
मुत्तरास्थानदेवता॥३४॥ मंडपे यास्थितादेवा रोषावामेच दक्षिणे। प्रणालं कारयेद्धीमान् जगत्यां चतुरो दिशः॥३५॥पूर्वीय
रास्यदेवानां कुर्यान्नो दक्षिणोत्तरं। ब्रह्म विष्णु शिवार्केन्द्रु गुहेः पूर्वापराङ्मुखाः॥३६॥नगरभिमुखाः श्रेष्ठा मध्ये वाह्येच
देवताः। गणेशो धनदो लक्ष्मीः पुरद्वारे सुखावहाः॥३७॥ विघ्नेशो भैरवश्चण्डी नकुलीशो ग्रहास्तथा। मातरो धनदश्चैव शु
भा दक्षिणदिङ्मुखाः॥३८॥नैर्ऋत्याभिमुखः कार्यो हनूमान् वानरेश्वरः। अन्ये विदिङ्मुखा देवा न कर्त्तव्याः कदाचन॥३९॥
सूर्यो द्वारेशो विष्णुश्च चंडी शम्भुः प्रदक्षिणे। भानोर्गृहे ग्रहास्तस्याग्रतो द्वादश मूर्तयः॥४०॥गणेशस्य गृहे तद्वच्चण्डी
शम्भुर्हरीरविः। मूर्तयो द्वादशान्येपि स्थाप्या गणा हिताश्च ये॥४१॥ विष्णोः प्रदक्षिणे नैव गणेशार्कस्त्रिका शिवाः। गोप्य
स्तस्यावताराश्च मूर्तयो द्वारकातथा॥४२॥चंड्याः शम्भुर्गणेशोऽर्को विष्णुः स्थाप्याः प्रदक्षिणाः। मातरो मूर्तयो देव्या यो
गिन्यो भैरवादयः॥४३॥शम्भोः सूर्यो गणेशश्चचण्डी विष्णुः प्रदक्षिणे। स्थाप्याः सर्वे शिवस्थाने दृष्टिवेधविवर्जिताः॥४४॥
रुद्रस्त्रिपुरुषो मध्ये रुद्रधामगतोहरिः। दक्षिणांगे भवे ब्रह्मा विधेयोसेभयावहः॥४५॥ रुद्रवक्त्रा त्रिभागोनो हरिरर्धे पिता
महः।तत्तुल्या पार्वती देवी सुखदा सर्वकामदा॥४६॥ इति प्रासादमंडने सूत्रधारमंडनेश्वरविरचिते वास्तुशास्त्रे द्वितीयोऽध्यायः॥०॥

अतिस्थूलासुविस्तीर्णा प्रासादाधारिणी शिला। अतीव सुदृढा कार्या इष्टिकचूर्णवारिभिः॥१॥ शिलोपरिभवेद्भित्तिर्मेकहस्ते
युगांगुलं। अर्धांगुलाभवेद्वृद्धिर्यावद्धस्तशतार्धकं॥२॥अंगुल्यंशविहीनेन अर्धेनार्धेनच क्रमात्। पंचादिकविंशति यावच्छतार्ध°
च विवर्धयेत्॥३॥ एकद्वित्रीणि भित्तानि हीनहीनानि कारयेत्। स्वस्वोदयप्रमाणश्चचतुर्थांशेन निर्गमः॥४॥ पीठमर्धं त्रिपादांशे
एकद्वित्रिकरे गृहे। चतुर्हस्ते त्रिसार्धांशं पादांशं पंचहस्तके॥५॥ दशविंशति षट्त्रिंशत्शतार्धहस्तकावधि। वृद्धिर्वेद त्रियुग्मेषु-
संख्या स्यादंगुलैः क्रमात्॥६॥ पंचांशहीनमाधिक्यं एकैकन्तु त्रिधा पुनः। त्रिपंचांशसमुत्सेधं द्वाविंशत्यंशनिर्गमः॥७॥नवांशो
जाड्यकुम्भश्च सपट्टांशे कनकं भवेत्। सान्तरांशा कपोताली सपट्टांशा ग्रासपट्टिका॥८॥ सूर्यदिग्वसुभागाश्च गजवाजिनराः क्रमात्।
वाजिस्थाने तथा कार्यं स्वं स्वं देवस्यवाहनं॥९॥ पंचांशः कनकाग्रेतु निर्गमो जाड्यकुम्भकः। त्रिसार्धं करकं सार्धचतुर्भिः
ग्रासपट्टिका॥१०॥कुंजराश्चनवावेदा रामयुग्मांशनिर्गमः। अंतरालमधस्तेषां मूर्ध्वाधः करणयुग्मकं॥११॥ गजपीठेसमाः
स्वल्पद्वये पुरुषं सहस्रे। जाड्यकुम्भकरणालीच ग्रासपट्टीतदाभवेत्॥१२॥ कामदं करणपीठं चजाड्यकुम्भकरणालिका॥तत्रि
र्निर्गमैहीनं साधारे निर्गमाधिकं॥१३॥सर्वेषां पीठमाधारं पीठहीनं निराश्रयं। पीठहीना विनश्यन्ति प्रासादभवनादयः॥
१४॥हस्तादि पंचपर्यन्तं विस्तारेणोदयः समः। संक्रमान्नवसप्तेषु रामचन्द्रांगुलाधिकः॥१५॥ पंचादि दशपर्यन्तं त्रिंशद्धस्तावधिकं।
धिकं। हस्तैकक्रमतो वृद्धिर्मनुसूर्यैर्नवांगुला॥१६॥एकहस्तादि पंचांतं पृथुत्वेनोदयः समः। हस्ते सूर्यांगुला वृद्धिर्यावत् त्रिंशत्

करावधि ॥२७॥ नवांगुलात्करे वृद्धि र्यावद्धस्तशतार्धकं। पीठोर्ध्व उदयश्चैव छाद्यान्तो नागरादिषु ॥२८॥ एकविंशतिभिर्भक्ते
प्रासादस्य समुच्छ्रये। पंचादिनवभागांतं पीठस्य प्रंथनोदयः ॥२९॥ वेदवेदेषुभक्तेषु छाद्यान्तो पीठमस्तकात्। पुरुषः
पंचभागः स्यात् विंशतिः कुंभकस्तथा ॥२०॥ कलशोऽष्टौ द्विसार्धेतु कर्त्तव्यमन्तरालकं। कपोतिकाष्टौ मंचीच कर्त्तव्या नवभा
गिका ॥२१॥ पंचविंशत्पदा जंघा तिथ्यंशैरुद्गमो भवेत्। वसुभिर्भरणी कार्या दिग्भागैश्च शरावटी ॥२२॥ अष्टांशार्धं कपोताली
द्विसार्धमन्तरालकं। छाद्यं त्रयोदशांशोच्चं दशभागैर्विनिर्गतं ॥२३॥ मेरुमरुद्भिर्वेदैर्मंचीभरण्यूर्ध्वोष्टभागिकः। पंचविंशतिका
जंघा उद्गमश्च त्रयोदश ॥२४॥ अष्टांशा भरणी शेषं पूर्ववत्कल्पयेत्सुधीः। सप्तभागा भवेन्मंचो कुट छाद्यस्य मस्तके ॥२५॥
षोडशांशा घुनजंघा भरणी सप्तभागिका। शिरावटी चतुर्भागात्सदः स्यात् पंचभागिकः ॥२६॥ सूर्यांशेषु च छाद्यं च सर्वकाम
फलप्रदं। कुंभकस्य मुखं शेषं स्तवरणं प्रवेशकः ॥२७॥ शिरावल्युद्गमो मंचीजंघा रूपाणि वर्जयेत्। अल्पद्रव्यं महत्पुण्यं कथितं
विश्वकर्मणा ॥२८॥ पीठतश्छाद्यपर्यंतं सप्तविंशतिभाजिते। द्वादशानां खुरादीनां भागसंख्या क्रमेण च ॥२९॥ स्यादेकवेदसार्धा
र्धं सार्धसार्धाष्टभिस्त्रिभिः। सार्धसार्धार्धभागैश्च द्विसार्धांशं निर्गमः ॥३०॥ पादांशेनेष्टकं पंचषडंशैः शैलदारुजे। साधरे
ष्टांशकाभित्तिर्दशांशाधातुरत्नजे ॥३१॥ मध्ये युगांशं भद्राढ्यं शुभदं प्रतिभद्रकं। फालनीडं गर्भगृहं दोषदं गर्भमायतं ॥३२॥ कुंभकेन

समा कुंभी समप्रान्तेनतूदयः। भद्रणाभरणं शीर्षं कपोतास्यासमं भवेत् ॥३३॥ पेटके कुटछाद्यस्य कुर्यात्पट्टस्य पेटकं। सपादांशः
सपादश्च सार्धो गर्भस्य विस्तरात् ॥३४॥ वृहद्वेदवालये पट्टपेटानां हि त्रिधोदयं। भवे दष्टांतिरेकांशं कुंभी स्तंभोर्ध्वं पंचभिः ॥३५॥ अर्धेन
भरणं शीर्षमेकं पट्टं तु सार्धकः। व्यासार्धेनकरोटं स्यात् द्वारोदयो विधमाश्रुभा ॥३६॥ मूलकर्णं स्थसूत्रेण कुंभोनो दुम्बरः समः। तदधः
पंचरत्नानि स्थापयेत् शिल्पिपूजया ॥३७॥ द्वारव्यासविभागेन मध्ये मन्दारको भवेत्। वृत्तं मन्दारकं कुर्यान्मृणालपद्मसंयुतं ॥३८॥
जाड्यकुंभकरणालीच कीर्तिवक्त्रा द्वयं तथा। उदुम्बरस्य पार्श्वेच शाखायास्तलरूपकं ॥३९॥ कुंभस्यार्धे त्रिभागे वा पादे हीनोऽप्यु
दुम्बरः। तच्छदं करणकं मध्ये पीठान्ते वा ह्यधोभूमिका ॥४०॥ पूरकेण समं कुर्यादर्धचन्द्रस्य चोत्सृतिं। द्वारव्याससमं दैर्घ्यं निर्गमंचतद्
र्धतः ॥४१॥ द्विभागमर्धचन्द्रंच भागेन द्वे गलारकौ। शंखपत्रसमायुक्तं पद्माकारैरलंकृतं ॥४२॥ एकहस्ते तु प्रासादे द्वारं स्याच्छोड
शांगुलं। षोडशांगुलिका वृद्धि र्यावद्धस्तनवष्टयं ॥४३॥ अष्टहस्तान्तकार्यं च दैर्घ्ये वृद्धिं तुरंगांगुलं। द्व्यंगुला प्रतिहस्तेच यावद्धस्तेशता
र्धकं ॥४४॥ यानवाहनपर्यंकं द्वारप्रासादसद्मनां। दैर्घ्यार्धेन पृथुत्वं स्यात् शोभनं तन्मुखाधिकं ॥४५॥ एकहस्ते तु प्रासादे द्वारं सूर्यां
गुलोदयं। सूर्यांगुला प्रतिकरं वृद्धिः पंचकरावधि ॥४६॥ पंचांगुलाच सप्तान्तं नवान्तं स्याद्युगांगुलं। द्व्यंगुला तु शतार्धान्तं वृद्धिः कार्या
कनं प्रति ॥४७॥ प्रासादेऽष्टकहस्ते तु द्वारं कुर्याद्दशांगुलं। रसहस्तान्तकं यावत्तावती वृद्धिरिष्यते ॥४८॥ पंचांगुला दशांतं च द्व्यंगुलाच शतार्धकं।

विमाने भौमजे मानं वराटेषु तथैवच ॥४७॥ मिश्रकेलतिनेचैव प्रशस्तं नागरे द्वयं। विमाननागरच्छन्देकूर्मो द्विमानपुष्पके ॥५०॥ सिंह-
वलोकने द्वारं नागरं शोभनं मतं। वलभ्कं भौमजं मानं कांसाकारेषु दारुजं ॥५१॥ श्रीतुजेरुलजे चैव प्रशस्तं नागरे द्वयं। नवशाखा महे-
शस्य देवानां सप्तशाखिकं ॥५२॥ पंचशाखं सार्वभौमे त्रिशाखं मरुजे स्मरे। एकशाखं भवेत् द्वारं शूद्रे वैश्ये द्विजे तथा ॥५३॥ समशाखंच
धूम्राये श्वानरासंभवायसे। त्रिपंचसप्तनवांशे शाखाः स्युरंगतुल्यकाः ॥५४॥ हीनशाखेनकर्तव्यमधिकाद्यं सुखावहं। अंगुलैसार्ध-
मर्धंवाकुर्यांद्धीनंतथाधिकं ॥५५॥आयदोषविशुद्ध्यर्थं द्वारवृद्धिर्नदुष्यति। चतुर्भागावितं कुर्यात् शाखाविस्तरमानकं ॥५६॥ मध्ये द्वि-
भागिकं कुर्यात् स्तम्भं पुरुषसंज्ञकं। स्त्रीसंज्ञकं भवेच्छाखा पार्श्वतोभागभागिका॥५७॥ निर्गमेचैकभागे न रूपस्तम्भः प्रशस्यते। एकांशं
सार्धभागंच पादेनद्व्यंशेवा ॥५८॥ द्विभागं निर्गमे कुर्यात् स्तम्भं द्रव्यानुसारतः। पट्टके विस्तरं कार्यं प्रवेशस्य युगांशकं ॥५९॥ कोणिका स्तम्भ
मध्येतु भूषणार्थं हि पार्श्वतः। द्वारदैर्घ्यं चतुर्थांशो द्वारपाली विधीयते ॥६०॥ स्तम्भशाखादिकं शैलं त्रिशाखेच द्विभाजयेत्। पत्रशाखाच गन्धर्वा
रूपस्तम्भस्तृतीयकः ॥६१॥ चतुर्थीखलु शाखाच सिंहशाखाच पंचमी। प्रथमा पत्रशाखाच गन्धर्वा रूपशाखिका ॥६२॥ चतुर्थी स्तम्भशाखाच
सिंहशाखाचसप्तमी। स्तम्भशाखा भवेन्मध्ये रूपशाखाग्रसूत्रतः ॥६३॥ पत्रागन्धर्वसंज्ञाच रूपस्तम्भस्तृतीयकः। चतुर्थी खलु शाखाच
गन्धर्वीतथ पंचमी ॥६४॥ रूपस्तम्भ स्तथा षष्ठो रूपशाखा ततः परा। खल्वशाखाच सिंहाख्या मूलकर्णेन संमिता ॥६५॥ यस्य देवस्य या मूर्तिः
सैवकार्यात्तरंगके। शाखायांच मरीवारे गरीशस्योत्तरंगके ॥६६॥ ॥ इति श्रीसूत्रधारमंडन विरचिते प्रासादमंडने तृतीयोऽध्यायः ॥३॥०

द्वारोच्छ्रयश्च नवधा भागमेकं परित्यजेत्। शेषेऽंशे द्विभागाच्चांशेन द्वारतोऽथवा ॥१॥ द्वारदैर्घ्येतुतत्तांशे निधिशक्रकलांशके। ऊर्ध्वाच
आसनस्थातु मनुविश्वार्कभागतः ॥२॥ चतुरस्रीकृते क्षेत्रे दशभागविभाजिते। भित्तिः कार्या द्विभागेन षड्भागं गर्भमन्दिरं ॥३॥ तृतीयांशेनगर्भस्य
प्रासादं प्रतिमोत्तमा। मध्यमा स्वदृशांशेन पंचांशेना कनीयसी ॥४॥ अग्रभागोर्भजेत् द्वारमष्टमं तूर्ध्वतस्त्यजेत्। सप्तमा सप्तमे दृष्टिर्वृषेसिं
हे ध्वजेशुभाः ॥५॥ षष्ठभागस्य पंचांशे लक्ष्मीनारायणादिकं। शयनार्चे सलिंगानि द्वारार्धेनव्यतिक्रमात् ॥६॥ पदार्धो यक्षभूताद्याः प्रादये
सर्वदेवताः। तदग्रे वैष्णवंवाह्यं मध्ये लिंगं शिवस्यच ॥७॥ छाद्यस्योर्ध्वे प्रहारः स्यात् शृंगं शृंगेतथैवच। प्रासादाः शृंगशृंगेषु अर्धेभागेतु
छाद्यकं ॥८॥ मूलकर्णे रथादेवा एकद्वित्रिक्रमंन्यसेत्। निराधारे मूलभित्त्योः साधारे भ्रमभित्तिषु ॥९॥ उरुशृंगाणि भद्रेस्युरेकादि
गृहसंख्यया। त्रयोदशोर्ध्वं सप्ताधो लुप्तानिचोरुशृंगकैः ॥१०॥ रेखामूलंच दिग्भागं कुर्यादग्रं षडंशकं। षड्वाहो दंडदं प्रोक्तं पंचमध्येन
शोभनं ॥११॥ सपादं शिखरं कार्यं सकरीशिखरोदयं। सपादकरणीयोर्मध्ये उदये पंचविंशतिः। प्रोक्तारेखा कलाभेदैर्वल्लरीः पंचविंशतिः॥
१२॥ पंचादिकन्तु युग्मांतं खंडानितेष्वनुक्रमात्। ऊर्ध्वशृङ्गाकलाः कार्या दैर्घ्ये स्कन्धे च तत्समाः ॥१४॥ अष्टादशषष्ठांतं चतुर्वृद्ध्या च
षोडश। दैर्घ्ये तुल्याः कलाः स्कंधे एकहीनास्सुशोभनाः ॥१५॥ ऊर्ध्वा अष्टादशांशास्युस्तिर्यक् षोडशमेवच। चक्रेऽस्मिन संभवन्त्येव रेखा
णां षट्शरद्वयं ॥१६॥ त्रिखंडात खंडवृद्धिश्च यावदष्टादशैवहि। एकैकांशौ कलाष्टौच समा चार्धी च षोडश ॥१७॥ द्वितीया प्रथमे खंडे
कलाष्टौ द्वितीयेनवा। तृतीये दशखंडेषु शेषेषूर्ध्वे क्रमः ॥१८॥ अष्टदिक् सूर्यभागैश्च त्रिखंडा तृतीया भवेत्। अग्रेण क्रममार्गेण

५—रेखाः स्युः पंचविंशतिः ॥१२॥ सपादकरणीयोर्मध्ये

कोष्ठानङ्कैः प्रपूरयेत् ॥२७॥ रेखाणां जायते संख्या षट्पंचाशत्शतद्वयं। दैर्घ्ये भवन्ति यावत्यः कलाः स्कंधे पितत्समाः॥२८॥ विंशत्या विभजे
द्भागैः शिलातः कलशान्तकं। मंडोरवाष्ट साधीष्ट नवांशैः शिखरं परं॥२९॥ रेखामूलस्य विस्तारात् पद्मकोषं समाचरेत्। चतुर्थांशेन सू
त्रेण समादं शिखरोदयं॥३२॥ स्कंधकोशान्तरे सप्तभक्ते ग्रीवातु भागतः। साधं सामलसारंतु पद्मं छत्रंतु साधकं॥३३॥ त्रिभागे उच्च
कलशे द्विभागस्तस्य विस्तरः। प्रासादस्याष्टमांशेन पृथुलं कलशोडके ॥३४॥ छाद्यतः स्कंध पर्यन्तमेकविंशतिभाजिते। अंकदिक् रुद्र
सूर्यांश विश्वांशैस्तस्य चोच्छ्रयः॥३५॥ शुकनासस्य संस्थाने छाद्यार्धं पंचधा मतं। एक त्रिपंच सप्तांक सिंहस्थानानि कल्पयेत॥३६॥
द्वारस्य दक्षिणेनासे कपाली षड्विधा मता। तदूर्ध्वे शुकनासः स्यात् सैव प्रासादनासिका॥३७॥ प्रासादेदशभागश्च द्विविवेदांश संमिता।
प्रासादार्धेन पादेन त्रिभागेनाथ निर्मिता॥३८॥ शृंगोरु शृंग प्रत्यंगे खंडकान् गणयेत सुधीः। नवकं तिलकं कर्णी कुर्यात् प्रासादभूषणं॥३९॥
दशांशे शिखरे मूले अग्रे तत्र नवांशके। साधांशकौ रथौ कोणौ द्वौ शेषं भद्रमिष्यते॥३०॥ रथयोरुभयोर्मध्ये वृत्तमामल सारकं। उत्सेधो
विस्तरार्धेन चतुर्भागैर्विभाजिते॥३१॥ ग्रीवाचामल सारस्य पादोनाच समादकः। चन्द्रिकाभागमानेन भागैरामल सारिका॥३२॥ घृतमात्रं
न्यसेन्मध्ये ताम्रतारसुवर्णजं। सौवर्णं पुरुषं तत्र तूलीपर्यंक शायिनं॥३३॥ प्रमाणपुरुषस्यार्धां गुलं कुर्यात्करं प्रति। त्रिपताकं करेवामे
हृदिस्थं दक्षिणोऽन्वुजं॥३४॥ प्रासादपृष्ठदेशेतु दक्षिणेतु प्रतीरथः। ध्वजाधारस्तु कर्त्तव्य ईशाने नैऋतेऽथवा॥३५॥ क्षीराणी वे समुत्पन्नं

प्रासादस्याग्रजातकं। मांगल्यंषु च सर्वेषु कलशं स्थापयेद्बुधः॥३६॥ पूर्वोक्तमानतोज्येष्ठः कोडशांशाधिको भवेत्। दंतांशेनत मध्यो
ऽस्य नवांशैरुदयो भवेत्॥३७॥ ग्रीवापीठं भवेद्भागं त्रिभागेनोडकं तथा। कणिके भागतुल्येच त्रिभागं बीजपूरकं॥३८॥ एकांशमग्रे द्वौ
मूले वह्निवेदांश कर्णिके। ग्रीवाद्वौ पीठमर्धं द्वौ खुरभागा विस्तरेऽण्डकं॥३९॥ दंडः कार्यस्तु तीक्ष्णांशैशिलातः कलशावधेः। मध्योऽष्टांशेन
हीनोऽसौ ज्येष्ठात् पादोनकन्यसः॥४०॥ प्रासादव्यासमानेन दंडोज्येष्ठः प्रकीर्त्तितः। मध्यो हीनो दशांशेन पंचमांशेन कन्यसः॥४१॥
एकहस्तसुरागारे दंडं पादोनमंगुलं। कुर्यादर्धांगुलावृद्धिर्यावत्पंचदशाहतं॥४२॥ सुवृत्तः सारदारुश्च ग्रंथिकोटरवर्जितः। पर्वभिः
विषमैः कार्यः समग्रंथिः सुखावहः॥४३॥ दंडदैर्घ्यं षडंशेन मर्काद्यार्धेन विस्तृता। अर्धचन्द्राकृतिः पार्श्वे घंटोर्ध्वं कलशस्तथा॥४४॥
ध्वज दंडप्रमाणेन दैर्घ्ये षष्ठांशेन विस्तरे। नानावस्त्रैर्विचित्राद्या त्रिपंचाग्र शिखोपमाः॥४५॥ पुरेचनगरे कोटे रथे राजगृहे तथा। वापीकू
पतडागेषु ध्वजाकार्या सुशोभना॥४६॥ निष्पन्नं शिखरं दृष्ट्वा ध्वजहीनं नकारयेत्। असुराः वासमिच्छन्ति ध्वजहीने सुरालये॥४७॥
ध्वजोच्छ्रायेण तुष्यंति देवाश्च पितरस्तथा। दशाश्वमेधिकं पुण्यं सर्वतीर्थफलाधिकं॥४८॥ पंचाशात् पूर्वतः पश्चात् आत्मानंच
तथाधिकं। शतमेकोत्तरं सोपि तारयेन्नरकार्णवात्॥४९॥ इति श्री प्रासादमंडने सूत्रधार श्रीमंडन विरचिते वास्तु शास्त्रे प्रतिमा
ध्यधिकारश्चतुर्थोऽध्यायः॥४॥ ॥ नानाविधमिदं विश्वं विचित्रं येन सूचितं। सूत्रधारः श्रिये सोऽस्तु सर्वेषां पालनक्षमः॥१॥

न्यूनाधिकं प्रसिद्धं च मतं किंचिन्मंडनोदितं। विश्वकर्म्म प्रसादेन शिल्पिनो मन्मतं वचः॥२॥ चतुर्भागं समारभ्य यावत्सूर्योत्तरं शतं।
भागसंख्येति विख्याता फालना कर्षणाह्यतः॥३॥ अष्टोत्तरं शतं भेदा अंशवृद्ध्या भवंतिते। समैः शैर्विषमैः कार्या नन्नाभेदैश्च फालना॥
४॥ एकस्यापितलस्योर्ध्वं ष्वपरापरि बहून्यपि। नामानिजातयस्तेषां मूर्ध्वभागानुसारतः॥५॥ दशहस्तादधो नस्यात् प्रासादोभ्रमसंयुतः।
नवाष्टदशभागेषु भ्रमो भित्तिर्विधीयते॥६॥ विराज्यश्चतुरस्रस्तु चतुर्द्वारश्चतुष्कका। प्रासादोब्रह्मणः प्रोक्तो धीमता विश्वकर्म्मणा॥
७॥ सपादंशिखरं कार्यं घंटाकलशभूषितं। चतुर्भिः शुकनासैस्तु सिंहकर्णैर्विराजितं॥८॥ एकद्वारं भवेत्पूर्वं द्विद्वारं पूर्वपश्चिमे।
त्रिद्वारमुत्तरं मध्ये दक्षिणास्यं विवर्जयेत्॥९॥ चतुर्द्वारं चतुर्दिक्षु शिवब्रह्मजिनालयं। होमशाला प्रकर्त्तव्या क्वचिद्राजगृहं तथा॥१०॥
वैराज्याद्याः समुत्पन्नाः प्रासादा ब्राह्मणार्चिताः। एकत्रिपंचसप्तांक संख्यागै पंच विंशतिः॥११॥ चतुर्भक्ते भवेत्कोणो भागो भद्रं द्विभागिकं।
भागार्धं निर्गमं भद्रे प्रकुर्यान्मुखभद्रकं॥१२॥ शृंगमेकं भवेत्कोणे द्वे द्वे भद्रे च नन्दने। शुद्धे भद्रे प्रतीभद्रे मुद्गमो रथिकोपरि॥१३॥ कर्णे
शृंगे सिंहकर्णैः सिंहनासस्तदोच्यते। देवानान्तु प्रकर्त्तव्यः सिंहस्तस्यैव मास्वतः॥१४॥ तथैते गिरिजा तस्य सौभाग्याधन पुत्रकैः॥१५॥
रथिकं सिंहकर्णं च भद्रे शृंगे च सिंहकं॥१५॥ कर्णशृंगंतु पंचांडं सश्रीनन्दनउच्यते। चंगाणीत्यथ षड्भागैश्चतुरस्रं विभाजयेत्॥१६॥
कर्णप्रतिरथं कुर्याद्भद्रार्धं भागभागिकं। सप्तनिर्गमसंलाच्च भद्रभागार्धनिर्गमः॥१७॥ द्वे द्वे कर्णे तथाभद्रे एकं शृंगं प्रतीरथे। मेरिरं
नतीयं भद्रंमलयंभद्रं त्यजेत्॥१८॥ प्रत्यंगं तिलकं कुर्यात प्रतीरथे विमानकं। भद्रोरुशृंग वैशाल प्रतिरथं सभूषणं॥१९॥ चतुरस्रेऽष्टभि

भक्ते कर्णप्रतिरथं रथं। भद्रार्धे भागभागंच भागार्धेन विनिर्गमः॥२०॥ द्वारिभागान्तरं कृता रथाश्च तुल्यनिर्गमाः। शृंगमुग्मंच तिल
कं कर्णे द्वेतु प्रतीरथे॥२१॥ एकं चोपरथे भद्रे --- त्रीणि चतुर्दश। शिखरं पंचविस्तारं महेन्द्रा राज्यदो नृणां॥२२॥ कर्णौ शृंगत्रयं शेषं
पूर्ववद्वलशीर्षकः। त्यक्तौकशृंगं भद्रस्य मत्तालंतु कारयेत्॥२३॥ मत्तके तस्य वृद्धास्य शृंगमुग्मं प्रदापयेत्। सितशृंगस्तदा
नाम ईश्वरस्य सदाप्रियः॥२४॥ तिलकं यद्युपरथे भूधरो नामनामतः। वाम शृंगेतु तिलकं नाभुवनमंडनः॥२५॥ शृंगद्वयं
चोपरथे तिलकं कारयेत् सुधीः। त्रैलोक्य विजयो भद्रे शृंगेन क्षितिवल्लभः॥२६॥ दशभागकृतेक्षेत्रे भद्रार्धं भागमानतः। त्रयं प्रति
रथेकर्णे --- भागसमो भवेत्॥२७॥ कर्णे प्रतिरथे भद्रे द्वेद्वे शृंगे प्रकारयेत्। रथोपरिस्थं तिलकं प्रत्यंगं चरथोपरि॥२८॥ मत्ताल
क्षयुतं भद्रं प्रासादोऽयं महीधरः। भद्रशृंगतृतीयं च कैलासः शंकरप्रियः॥२९॥ भद्रे त्यक्ता रथे शृंगं नव सालः समुच्यते। तथाभद्रे
पुनर्दद्यात्तदासौ गन्धमादनः॥३०॥ भद्रे त्यक्ता चोपरथे शृंगं सर्वांगसुन्दरः। भद्रेदद्यात्पुनः शृंगं विजयानन्द उच्यते॥३१॥ मत्ताल
क्षयुतं भद्रमुरुशृंगं परित्यजेत्। शृंगद्वयं च षड्धोर्ध्वे सर्वांगतिलकस्तदा॥३२॥ उरुशृंगं ततोदद्यान्मत्तासस्वमेनन्दितं। महाभोग
स्तदा नाम सर्वकामफलप्रदः॥३३॥ कर्णे प्रतिरथेचैकं रथे तूपरथादिषु। मेरुरेव समारभ्यातः सर्वदेवैः सुपूजितः॥३४॥ प्रदक्षि
णात्रये स्वर्गे मेरोः पुंसां च यत्फलं। इष्टिका शैलजे मेरौ स्यात्प्रदक्षिणके कृते॥३५॥ वैराज्य प्रमुखा येच नागरा ब्रह्मणोदिताः। वल्लभाः
सर्वदेवानां शिवस्यापि विशेषतः॥३६॥ इति प्रासादमण्डने सूत्रधार श्रीमंडन विरचिते वास्तु शास्त्रे पंचविंशतिप्रासादाधिकारे पंचमोऽध्यायः॥५॥०५

केसरीसर्वतोभद्रेनन्दनो नन्दशालकः। नन्दीशो मन्दिरश्चैव श्रीवृक्षश्चामृतोद्भवः॥१॥ हेमवान् हेमकूटश्च कैलाशः पृथिवीजयः।
इन्द्रनीलो महानीलो भूधरो रत्नकूटकः॥२॥ वैदूर्यं पद्मरागश्च वज्रकोनुकुटोज्ज्वलः। रैरावतो राजहंसो गरुडो वृषभध्वजः॥३॥
मेरुप्रासादराजश्च देवानामालयोद्भिसः। ब्रह्मविष्णुशिवार्काणां नान्येषां च कदाचन॥४॥ आद्याः पंचौडको ज्ञेयः केसरीनामनामतः।
चतुर्णां क्रमतो वृद्धिर्यावदेवोत्तरं शतं॥५॥ हेत्रेऽष्टांशैर्विभक्तेतु करणे भागद्वयं भवेत्। भद्रार्धे करणतुल्यंतु भागेनैकेन निर्गतं॥६॥
दशांशेसार्धभागं च भद्रार्धेच प्रतिरथः। करणौ द्विभागसूर्यांशे भद्रार्धं प्रतिरथकं॥७॥ चतुर्दशविभक्तेतु करणार्धं द्वादशांशवत्।
भद्रपार्श्वद्वये कार्यौ भागभागेन नन्दिका॥८॥ षोडशांशे प्रकर्त्तव्यः करणः प्रतिरथान्तरे। कोणिका भागतुल्याच शेषं चतुर्दशांशवत्॥
९॥ अष्टादशांशे भद्रस्य पार्श्वे द्वेद्वेच करणिका। कर्त्तव्ये भागभागेच शेषं स्यात् षोडशांशवत्॥१०॥ चतुरस्रीकृतेक्षेत्रे विंशत्यंशविभाजिते। करणौ द्विभागः कार्यौच सार्धांशा पृथुविस्तरे॥११॥ द्विभागस्तु प्रतिरथो नन्दिका सार्धभागिका। भद्रनन्दी भवेद्भागा भद्रार्धे युग्मभागिका॥१२॥ द्वाविंशत्यंशके नन्दी भागैका भद्रपार्श्वयोः। त्रयः प्रतिरथाः करणौ भद्रार्धेच द्विभागिकं॥१३॥ एकाद्विकत्रिकं त्रीणि वेदाश्चत्वारि पंचच। तलेषु क्रमतोऽष्टास्रे कथ्यादुः शिखरांशिहि॥१४॥ शिखरं त्रेकवेदैक षट् त्रिवेदयुगद्वयं। तलेषु क्रमतः प्रोक्तं मूलसूत्रे पराजिते॥१५॥ तलेष्वष्टासु विहिताः प्रासादाः पंचविंशतिः। त्रयः त्रयः क्रमेणैव चत्वारस्त्वष्टमे तले॥१६॥ त्रीणि त्रीणि स्वकीयानि द्वेद्वेतु

परमस्यच। शिखरांशि विधेयानि विश्वकर्म्मवचोयथा॥१७॥ द्व्येकषट्त्रयोऽष्टादि तलेषु पंचसुक्रमात्। सप्तैव सप्तमे सृष्टे शिरांसि
त्रीणिचाष्टमे॥१८॥ भेदाः पंचाशदेकैकस्योक्ताः श्रीविश्वकर्म्मणा। तेनैकस्मिंस्तलेऽपि स्युः शिखरांशि बहून्यपि॥१९॥ रथिकां सिंह
करणेच भद्रेकुर्याद्बाह्यकान्। प्रत्यंगैस्तिलकाद्यैश्च शोभितं सुरमन्दिरं॥२०॥ प्रासादाः केसरिमुखाः सर्वे देवेषु पूजिताः। पुरराज्ञः
प्रजादीनांकर्त्तुः कल्याणकारकाः॥२१॥ षट्त्रिंशत्करमोऽधस्ताद्यावद्धस्तचतुष्टयं। विनाभ्रमैर्निराधारः कर्त्तव्यः शान्तिमिच्छता॥२२॥
वास्तोः पंचविधंक्षेत्रं चतुरस्रमथायतं। वृत्तं वृत्तायतंचैवाष्टास्रं देवालयादिषु॥२३॥ विस्तारेतु चतुर्भागआयामे पंचभागिके। ऊर्ध्वं
विकलशान्कुर्यात् पृष्ठेऽग्रे सिंहसिंहकरणीकं॥२४॥ वृत्तायतेऽथकर्त्तव्यं व्यासार्धंवामद्दक्षिणे। करणान्ते भ्रामयेद्दत्तं वृत्तेभद्रारिणि
चाष्टहि॥२५॥ प्रासादो वर्तुलोऽष्टास्रैः प्रायेरोकारयुक्तः शुभः। करणैवा त्रिरथोरम्यो मेरुपं तत्स्वरूपकं॥२६॥ विचित्रैरूपसं
घातैर्भद्रैर्गवाक्षभूषितैः। वितानफालनाशृंगैरनेकैर्नागरा मताः॥२७॥ पीठोपरि भवेद्वेदी पीठारिचीरिणि पंच वा। पीठतो
द्वाविडेरेखालता शृंगादि संयुताः॥२८॥ भूमिकोपरि भूमिश्च ह्रस्वा ह्रस्वानवान्तकं। विभक्तिदलसंयुक्तं मूर्ध्नि शृंगैर्नभूमिजा॥
२९॥ शृंगैरनेकैर्नलतिना श्रीवत्सवारिसंयुता। नागरा भ्रमसंयुक्ताः साधारास्ते प्रकीर्तिताः॥३०॥ पंचहस्तो भवेन्मेरुरेकोत्तर
शतांडकः। भेदाः पंचोनपंचाशत् करवृद्ध्या भवंतिते॥३१॥ हस्तो हस्ते भवेद्वृद्धिस्तंडकानांच विंशतिः। एकोत्तरसहस्रं स्यात् शृंगाणांच

शतार्धके ॥३२॥ केसरि प्रस्तरकाः कर्णे विमानं वीरुशृंगके। तथैव मूलशिखरं पंचभूमिविमानकं ॥३३॥ विमाननागरो जातिस्तदा
प्राग्रेरुदारुता। एवं शृंगेषु शृंगाणि संभवन्तिबहून्यपि ॥३४॥ श्रीमेरुरष्टभागः स्यादेकोत्तरशतांडकः। हेमशीर्षो दशांशश्च युतः
सार्धशतांडकैः॥३५॥ भागैर्द्वादशभिर्युक्ताः सार्धद्विशतसंयुतः। सुरवल्लभनामातु प्रोक्तः श्रीविश्वकर्मणा॥३६॥ कोणो द्विभाग
एकांशः कर्णो सार्धद्वितीयकः। अर्धांशनन्दिकाभद्रमर्धभागेन संमितं ॥३७॥ त्रिशतं पंचसप्तत्याधिकं यत्रांडकानिहि॥
भक्तं चतुर्दशांशेस्तु नाम्ना भुवनमंडनः॥३८॥ कोणः कोणी प्रतिरथो नन्दो भद्रार्ध मेवच। द्वौकं द्व्यर्धाच सार्धांशै श्चतुर्दश
विभाजिते ॥३९॥ वाणैकवेद युग्मांशवेदाः कर्णादि गर्भतः। रलशीर्षो भवेन्मेरुः पंचशतैक शृंगकैः॥४०॥ रुद्रौक युग्मचन्द्रा
द्वौपुरणांश विभाजिते। किरणो द्रुवमेरुश्च सपादष्ट शतांडकः॥४१॥ रामचन्द्रद्वि युग्मांशै र्नेत्रे -- विभाजिते। नाम्ना कम
लहंसः स्यात सार्धसप्तशतांडकः॥४२॥ भागैः कर्णादि गर्भान्तं वेदसार्ध त्रिसार्धकैः। द्व्यर्धांच स्वर्णकेतुश्च पंच सप्ताष्टशृंग
कैः॥४३॥ वेदैकराम युग्मांशनेत्रै र्जिन विभाजिते। वृषभध्वज मेरुश्च सैकांडक सहस्रवान ॥४४॥ सभ्रमो भ्रमहीनश्च महामेरौ
भ्रमद्वयं। साधारेषु प्रकर्त्तव्यं भद्रे चन्द्रावलोकनं ॥४५॥ राजः स्यात् प्रथमो मेरु स्ततो हीनाद्विजादिषु। विनाराज्ञान्यवर्णेन
कृतेमेरौ महद्भयं ॥४६॥ इतिप्रासादमंडने सूत्रधार श्रीमंडनविरचिते वास्तु शास्त्रे षष्ठोऽध्यायः॥ ६॥ ॥ रलगर्भाकर्णसूर्य

चन्द्रतारा वितानकं। विचित्रमंडपं येनकृतंतस्मै नमः सदा॥१॥ कर्णयुढो विलोकाश्च एकत्रिद्वारसंयुतः। प्रासादाग्रे प्रकर्त्तव्यः
सर्वदेवेषु मंडपः॥२॥ गूढस्त्रिकस्तथा मृत्यः क्रमेण मंडपास्त्रयः। जिनस्याग्रे प्रकर्त्तव्या सर्वेषांतु बलानकं ॥३॥ समंसपादप्रा
सादात् सार्धं पादोनितद्वयं। द्विगुणंवा प्रकर्त्तव्यं मंडपं पंचधा मतं ॥४॥ समं सपादं पंचाशत् पर्यन्तं दशहस्ततः। दशान्तं पंचतः
सार्धं द्विपादोनं चतुःकरे ॥५॥ त्रिहस्ते द्विगुणं ह्येकहस्ते कुर्याच्चतुःकिकां। प्रायेण मंडपं सार्धं द्विगुणं प्रत्यलिंगकौ॥६॥ मंडपैः
स्तम्भपादार्धं मध्यपादानुसारतः। शुकनासः समाघंटा न्यूना श्रेष्ठान्त्याधिका ॥७॥ मुखे मंडपसंघातो यदा भित्त्यंतरे भवेत्।
नदीमः स्तम्भपादार्धैः समेना विष्मतले॥८॥ नवाष्टदशभागेषु विभिश्छंडावलोकनं। हस्तैकं त्र्यंगुलोनंवा तदूर्ध्वं स्तंभवारणं॥
९॥ सार्धपंचाशकैर्भक्तो सपादरजसेनकं। सपादत्र्यंशकावेदी भागेनासनपट्टकं ॥१०॥ तदूर्ध्वं सप्तसार्धांशै र्भावत्पट्टस्य
पेटकं। सार्धपंचांशकैः स्तम्भः पादोनं भरणं भवेत्॥११॥ भागार्धं भरणं वापि सपादंसार्धतः शिरा। पट्टो द्विभागस्तस्योर्ध्वे कर्त्त
व्यः छाद्यकोदयः॥१२॥ त्रिभागेललनार्धार्धं नस्तेटं पट्टपेटके। अर्धांशोर्ध्वकपोलाली द्विभागः पट्टविस्तरः॥१३॥ प्रासादद्श
रुद्रार्कभागेन स्तम्भविस्तरः। वेदाष्टरविविंशत्या कर्णोवृत्तस्तु पंचधा॥१४॥ द्वाराग्रे स्तम्भवेदाद्याः प्राग्ग्रीवी मंडपो भवेत्। द्विद्वि
स्तम्भविवृद्धाच क्रोडशैवं प्रकीर्त्तिताः॥१५॥ भित्ति प्रासादवद्भूढे मंडपेष्टविधेषुच। चतुरस्रः सुनन्दश्च तथा प्रतिरथान्वितः॥१६॥ मुख

भद्रयुतोवापि द्वित्रिप्रतिरथैर्युतः। करणैर्दर्कांतरेणाथ भद्रैर्दर्क विभूषितः॥२७॥ दलेनार्धेन पादेन दलस्य निर्गमो भवेत्। मूलप्रासा
दवच्छ्रेष्ठे षट्जंघादिर्मनोरमः॥२८॥ गवाक्षिणान्वितं भद्रमथजालकसंयुतं। गूढेऽथ करणैर्गूढे वाभद्रे चन्द्रावलोकनं॥२९॥
त्रिद्वारे चैकवक्त्रोऽथ मुखवेकार्धा चतुःकिका। गूढे प्रकाशके अत्र मर्धोदयकरोटकं॥३०॥ एकत्रिवेदषट्सप्तांक चतुष्कत्रिकत्रये।
अग्रेभद्रं विना पार्श्वे पार्श्वयोरग्रतस्तु वा॥३१॥ अग्रतस्त्रिचतुष्काश्च तथा पार्श्वद्वयेपिच। मुक्ताकोणे चतुष्कौद्वे इति द्वादशमंडपाः॥
३२॥ गूढस्याग्रे प्रकर्त्तव्या नानाचतुष्किकान्विता। चतुरस्रादिभेदेन वितानैर्बहुभियुता॥३३॥ त्रिकाग्रे रंगभूमिर्या तत्रैव नृत्यमंडपात्।
प्रासादाग्रेऽथासर्वत्र तान् प्रकुर्यात्द्विधाननः॥३४॥ सप्तविंशतिरुक्तायेमंडपा विश्वकर्मणा। तत्रैश्च विप्रैस्तुल्योच्चैः स्तंभैः समैस्तथा॥
३५॥ प्रथमो द्वादशस्तम्भो द्विद्विस्तम्भविवर्धनात्। यावत् षष्टिश्चतुर्युक्ता सप्तविंशति मंडपाः॥३६॥ त्रेवार्धं स्वकडंशोनावैकास्रा
ष्टास्र उच्यते॥ कलास्त्रेचैव षड्भाग तत षडंशेन संयुता॥३७॥ अष्टास्रं षोडशास्रंच वृत्तंकुर्यात्सदृर्धतः। उदयं वितरार्धेन षष्टं
पंचाशता भवेत्॥३८॥ करणैर्दर्कुरेकाः सप्तभागेन निर्गमो द्विजाः। रूपकंठस्तु पंचांशो द्विभागेनात्र निर्गमः॥३९॥ विद्याधरैः
समायुक्तं षोडशाष्टदिवाकरैः। जिनसंख्यामितैर्वापि दत्तं तुल्यैर्विराजितं॥४०॥ विद्याधरः पृथुस्तेच सप्तांशो निर्गमे दश। तदूर्ध्वे
चित्ररूपास्तु नर्तका नृत्यशोभिनः॥४१॥ गजतालुक षट्सार्धाः प्रथमा द्वितीयातु षट्। तृतीया सार्धपंचाशा कीर्णानि त्रीणि पंचवा॥
४२॥ मध्ये वितानं कर्त्तव्यं चित्रवर्णैर्विराजितं। नाटकादिकथारूपैर्नानाकारैर्विराजितं॥४३॥ एकादिदशशतान्येव वितानानि त्रयोदश।

शुद्धसंधारणिश्चापि द्विप्रोतक्षिप्तानि यानिच॥४४॥ वितानानि विचित्राणि वस्त्रचित्रादिभेदतः। तानिलोके प्रवर्त्तन्ते तस्मादेतानि
लोकतः॥४५॥ मंडपेषु च सर्वेषु पीठंतेरंगभूमिकं। कुर्यादुत्तानपादेन चित्रप्राप्तारंगजेनच॥४६॥ बलानश्चित्रगेहाग्रे राजद्वारे
गृहेपुरे। जलाशयेऽथ कर्त्तव्यं सर्वेषां मुखमंडनं॥४७॥ जगतीपादविस्तीर्णं पादपादेनवर्जितं। शालालिन्दनगर्भेण प्रासादेन
समंभवेत्॥४८॥ उत्तमेकन्यसं मध्येमध्यंज्येष्ठेतुकन्यसं। एकद्वित्रिचतुःपंचसप्तभूपटान्तरे॥४९॥ मूलप्रासादवद्द्वारं
मंडपेच बलानकं। न्यूनाधिकं नकर्त्तव्यं दैर्घ्येरुंदेतथोच्छ्रयाधिकं॥५०॥ पीठकेचोत्तरंगानं सर्वेषां समसूत्रतः। अंगशोभनसमं
षष्ठं जगत्या श्चोत्तरंराजं॥५१॥ जगत्यग्रे चतुष्कीयावामनं तद्बलानकं। वामेऽथदक्षिणेद्वारं द्वेद्वेकामत्तवारणं॥५२॥ ऊर्ध्वभूमिः
प्रकर्त्तव्या नृत्यमंडपसूत्रतः। मत्तवारणकं वेदि वितानतोरणैर्युता॥५३॥ राजद्वारे बलानेच पंचवा सप्तभूमिका। तद्विमानं
बुधैः प्रोक्तं पुष्करंनारि मध्यतः॥५४॥ हर्म्यं जाड्यगृहंवापि कर्त्तव्यं गोपुरकृति। एकभूमेस्त्रिभूम्यन्तं गृहेद्वाराग्रमस्तके॥५५॥
संवरणं प्रकर्त्तव्या प्रथमा पंचघंटिका। चतुर्घंटाभिवृद्धिंच यावदेकोत्तरंशतं॥५६॥ पंचविंशतिरित्युक्ता प्रथमा वसुभागिका।
चैवोत्तरंशतंयावद्वेदांशावृद्धिरिष्यते॥५७॥ भद्रार्धेरथिकार्धेन नवांगं वामदक्षिणे। ऊर्ध्वोदयेनरथिका घंटाकूटंनवांगकं॥
५८॥ कलाकूटान्विता मूर्ध्नी पंचभिःकलशैर्युता। भागास्तुलैस्तथास्तिर्हैरेवमन्याश्चलक्षितः॥५९॥ इतिप्रासादमंडने सप्तभोऽध्यायः॥७॥

इति साधारणाध्यायः सर्वलक्षणसंयुतः। विश्वकर्म्मप्रसादेन विशेषेण प्रकथ्यते ॥१॥ मानन्यूनाधिकं वापि स्वयंभूवाणलिंगजे।
घट्टितेषु विधातव्यमर्चालिंगेषु शास्त्रतः ॥२॥ बहुलेपमलक्षेपं पंच सप्त सर्वशिरोरुहः। सशिल्पं प्रादहेन्नंच तच्च वास्तु विनश्यति ॥३॥ अन्य
वास्तूचिते द्रव्ये अन्यवास्तु निवेशिते। प्रासादेन भवेत्पुण्यं गृहेनुवसेत्पतिः ॥४॥ स्वस्थानेसंस्थितं यच्च विप्रवास्तु शिवालये। अवाप्यं
सर्वदेशेषु चालिते राष्ट्रविभ्रमः ॥५॥ वापीकूपतडागानि प्रासादभुवनानिच। जीर्णान्युद्धृते यत्तु पुण्यं सप्तगुणं भवेत् ॥६॥ तद्भग्नं
तलमात्रं स्यात् पूर्वसूत्रं नचालयेत्। हीनेतु जायते हानिरधिके स्वजनक्षयः ॥७॥ वास्तुद्रव्याधिकं कुर्यात् मृलाबेरं शिलजंहिवा।
शैलजे धातुजं चैवं धातुजे रत्नजं तथा ॥८॥ पूर्वोत्तरदिशा मूढं मूढं पश्चिमदक्षिणे। तत्र मूढ ममूढं वा यत्र तीर्थं समाहितं ॥९॥ सिद्धायतन
तीर्थेषु नदीनां संगमेषुच। स्वयंभूवाण लिंगेषु तत्र दोषो न विद्यते ॥१०॥ अव्ययं मृन्मयं चास्यं विहस्तांतंतु शैलजं। दारुजं पुरुषार्धं हि
अतऊर्ध्वं नचालयेत् ॥११॥ विप्रमस्थानमाश्रित्य भग्नं यत्स्थापितं परैः। तत्र स्थानस्थिता देवा भग्नाः पूज्याः फलप्रदाः ॥१२॥ यद्यथास्थापितं
वास्तु तत्तथैवाहकारयेत्। अव्यंगे चालितं वास्तु दारुणं कुरुते भयं ॥१३॥ अथतच्चालयेत् प्राज्ञो जीर्णं व्यंगंच दूषितं। आचार्यः शिल्पिभिः
प्राज्ञैः शास्त्रदृष्ट्या समुद्धरेत् ॥१४॥ स्वर्णजं रूप्यजं वापि कुर्यान्नागमथोवृषं। तस्य शृंगेण दंतेन प्रतिष्ठां प्रातयेत् सुधीः ॥१५॥ मंडलं जाल
कंचैव कीलकं सुषिरं तथा। छिद्रसंधिश्च गारश्च महादोषा इतिस्मृताः ॥१६॥ भिन्नं दोषकरं यस्मात् प्रासादमठमंदिरं। मूलाभिजीर्णकै
र्द्वारै रश्मिवातैः प्रभेदितं ॥१७॥ व्रश्चनविषुशेनाकीरणं भिन्नं दोषकरं नहि। विनगो रोगशोनी गृहं भिन्नं विवर्जयेत् ॥१८॥ व्यक्तायक्तं
गृहं कुर्यात् अभिन्नाभिन्नमूर्त्तिकं। यथास्वामिशरीरंच प्रासादंचैव तादृशं ॥१९॥ भिन्नंचतु विधंज्ञेयमष्टधाभिन्नकं मतं। भिन्नके पूजितं
तत्र भिन्नंवै दोषकारकं ॥२०॥ छेदभेदोनकर्त्तव्यो जातिभेदोऽथवा पुनः। उत्पद्यते महामर्म जातिभेदेकृते सति ॥२१॥ द्वारहीनेहीनवसु
नालिहीनेधनक्षयः। अपदस्थापितैः स्तम्भैर्हारेगं विनिर्दिशेत् ॥२२॥ स्तम्भव्यासोदयेहीनेकर्त्ता तत्र विनश्यति। प्रासादे पीठहीनेतु
नश्यंतिगजवाजिनः ॥२३॥ स्थोपस्थहीनेतु प्रजापीडां विनिर्दिशेत्। करणहीनेतु प्रासादे फलं क्वापि न विद्यते ॥२४॥ जंघाहीनेहरेत्
बंधून् कर्तृकारापदादिकान्। शिखरेहीनमानेतु पुत्रपौत्रं नविद्यते ॥२५॥ अतिदीर्घे कुलीच्छेदो ह्रस्वे व्याधिं विनिर्दिशेत्। तस्मात् शास्त्रोक्त
मानेन सुखदं सर्वकामदं ॥२६॥ जगत्या लोपयेच्छालां शालया चैव मंडपं। मंडपेनच प्रासादो ग्रस्तो वै दोषकारकः ॥२७॥ प्रासादो
च्छ्रयविस्तारैर्जगतीवामदक्षिणे। छाद्यो भेदानकर्त्तव्या तथालिंगस्यपीठिका ॥२८॥ जगत्यास्त्रिचतुःपंचगुणं देवपुरं त्रिधा। एकद्वि
वेदसाहस्रहस्तैः स्याद्राजमंदिरं ॥२९॥ कक्षाष्टवेदसाहस्रैस्तैराजपुरं समं। दैर्घ्ये तुल्यं समादाष्टसार्धांशेनाधिकं शुभं ॥३०॥ द्वादे
शात्र पुराणि स्युर्देवस्थानानिचत्रिधा। षट्त्रिंशतः षड्विधाया वृद्धिरेकोत्तरं शतं ॥३१॥ पुरं प्रासादरूढैः स्यात् सौधैर्जालैर्गवाक्षकैः।
कीर्तिस्तंभैर्जलाराभैर्गूढैर्नालिश्च शोभितं ॥३२॥ प्रासादस्योत्तरे सौम्ये तथाग्नौपश्चिमेऽपिवा। यतीनां मोक्षदंकुर्यान्मठंतु
द्वित्रिभूमिकं ॥३३॥ द्विशालं मध्यषट्दारुषट्शालाग्रशोभितं। मत्तेवारणमग्रेच तद्वदूर्ध्वासु भूमिषु ॥३४॥ कोष्ठागारंच नाम्ये
वह्निकोणेमहानसं। पुष्पगेहं तथैशाने कृत्ये पात्रमायुधं ॥३५॥ सत्रागारंच पुरतो वारुण्यां चजलाशयं। मठस्य प्रतिः कुर्याद्दिवा

द्वारव्यानमंडपं ॥३६॥ पूर्वोक्तास्तु पुरुषाद्या प्रतिष्ठा सर्वसिद्धिदा। रवौ सौम्यायने कुर्यादेवानां स्थापनादिकं ॥३७॥ प्रतिष्ठा चोत्तरायणे
आर्द्रायांच पुनर्वसौ। पुष्ये हस्ते मृगे स्वातौ रेवत्यां श्रुति मैत्रभे ॥३८॥ तिथिं रिक्तां कुजं धिष्ण्यं क्रूरविद्धं युतं तथा। दग्धां तिथिंच
संडान्तं चरभोपग्रहं त्यजेत्॥३९॥ स्थिरे लग्ने सुमुहूर्तेचलग्ने सौम्ययुते क्षिते। अभिषेकः प्रतिष्ठाचलग्ने सौम्ययुते क्षिते ॥४०॥ प्रासादा
श्रेतशैशाने उत्तरे मंडपः शुभः। विप्रंच सप्तनवैकादशविश्वकरान्तरं ॥४१॥ मंडपः स्यात् करैरष्टादश सूर्यकलामितैः।
षोडशहस्ततः कुंडवशाद्धिक दृश्यते ॥४२॥ स्तम्भषोडशसंयुक्तं तोरणादिविराजितं। मंडपं वेदिकामध्ये पंचाष्टनव
कुंडकं ॥४३॥ हस्तमात्रं भवेत्कुंडं मेखलायोनि संयुतं। आगमैर्वेदमंत्रैश्च होमं कुर्याद्विधानतः ॥४४॥ अयुते हस्तमात्रंहिलक्षे
धेनुद्विहस्तकं। त्रिहस्तं लक्षहोमे स्याद्दशलक्षे चतुष्करं ॥४५॥ त्रिंशल्लक्षे पंचहस्तं कोट्यर्धे सप्तकरं मतं। सप्तहस्तं अष्टिलक्षे कोटि
होमे कराष्टकं ॥४६॥ गृहपूजाविधानेच कुंडमेकाकरं भवेत्। मेखलात्रितयं वेदरामयुग्मांगुलैः क्रमात् ॥४७॥ एकादित्रिकरं
कुंडीद्वेदिकोपरि मंडलं। ब्रह्मविष्णुरवीनांतु सर्वतो भद्रमिष्यते ॥४८॥ भद्रंतु सर्वदेवानां नवनाभिःतथात्रयं। लिंगोद्भवंशि
वस्यापिलतालिंगोद्भवंतथा ॥४९॥ भद्रंच गौरीतिलकं देवीनां पूजनेहितं। अर्धचन्द्रं तडागेषु चापाकारं तथैवच ॥५०॥ ढंकारंस्व
स्तिकंचैव वापीकूपेषु पूजयेत्। पीठिकाजलपभ्रेतु योन्याकारंतुकामदं ॥५१॥ गजदंतं महादुर्गे प्रशस्तं मंडपं यजेत्। ढंकारं चतुरस्रं

च गजदंतमिहोच्यते ॥५२॥ विख्यातं सर्वतोभद्रं शेषान्यान्यान्यलोकतः। पूर्वादितोरणं प्लक्षं यज्ञांगवटपिप्पलैः ॥५३॥ द्वात्रिंशत् षोडशाष्टौच
ऋत्विजोवेदपारगान्। कुलीनान् ज्ञानसंपूर्णान् यज्ञार्थे अभिमंत्रयेत् ॥५४॥ मंडपस्थे त्रिभागेन उत्तरे स्नानमंडपं। स्थंडिलं वालुकं
कृत्वा शय्यायां स्नापयेत् सुरं ॥५५॥ पंचगव्यैः कषायैश्च वल्कलैः क्षीरवृक्षजैः। स्नापयेत पंचकलशैः शतवारं जलेनच ॥५६॥ देव
मंत्रैश्चवादित्रगीतमंगलनिस्वनैः। वस्त्रेणाच्छादयेद्दीपं वेद्यंतं मंडपं नयेत् ॥५७॥ तूल्यामारोपयेद्वेद्यां शुक्लवस्त्रं विन्यसेत्ततः। कलशं
तु शिरोदेशे पादस्थाने कमंडलुं ॥५८॥ अंजनं दक्षिणे देशे दर्पणं वामतः शुभं। रत्नन्यासं ततः कुर्याद्दिक्पालादिकपूजनं ॥५९॥
वज्रं वैदूर्यकं मुक्ता मिन्द्रनीलं सुनीलकं। पुष्परागं च गोमेदं चन्द्रं पूर्वादितोन्यसेत् ॥६०॥ सुवर्णं रजतं ताम्रं कांस्यं रीतिं च सीसकं।
वंगंलोहं च पूर्वादेरष्टौ धातूनिहन्यसेत् ॥६१॥ वल्लीवृक्षः सहदेवी विष्णुक्रांतेन्द्रवारुणी। शंखिनी ज्योतिष्मती चैव ईश्वरी ताः क्रमान्यसेत्॥
६२॥ यवो व्रीहिस्तथा कंगू चूर्णार्धं च तिलैर्युतं। शालिमुद्गाः समाख्याता गोधूमश्च क्रमेण हि ॥६३॥ यद्देवाभरणं पूजावस्त्रालंकारभूषणं।
तत्सर्वं शिल्पिनेदेयमाचार्यायतु यत्नियं ॥६४॥ ततोमहोत्सवं कुर्यान्नृत्तगीतैरनेकशः। नैवेद्यान्नत्रिकं पूजामंगन्यासादिकं तथा ॥६५॥
क्षीरं क्षौद्रं घृतं खंडं पक्वान्नानिबहून्यपि। षड्रसस्वादुभक्ष्याणि समन्तात्परिकल्पयेत् ॥६६॥ विप्राणां संप्रदायाच्च वेदमन्त्रैस्तथागमैः।
सकलीकरणं जीवन्यासं कृत्वा प्रतिष्ठयेत् ॥६७॥ प्रासादेवतान्यासं स्थावरेषु पृथक्पृथक्। रत्नशिल्पीयंचवाराह नागकुलानिच ॥६८॥

प्रकुंभे जलदेवांश्च पुष्पके किंनरांस्तथा। नन्दिनं जाड्यकुंभेच करणाख्यास्थपत्यरिं॥६७॥ गरुडं राजपीठेच उरश्वपीठे तथाश्विनौ।
नरपीठे नरांश्चैव हयांश्च खुरकेजयेत्॥७०॥ भद्रे सन्ध्यात्रयं कुंभे पार्वती कलशे स्थिता। कपोतास्यां तु गंधर्वान् मंचिकायां सदस्वतीं॥
७१॥ जंघायांच शिलापालान् इन्द्रमुद्गम संस्थितं। सावित्रीं भरणीदेशे शिराक्ष्यांच देविकां॥७२॥ विद्याधरान् कपोतालामन्तरास्यां सुरां
स्तथा॥ पर्जन्यं कूटछाद्येच ततो मध्ये प्रतिष्ठयेत्॥७३॥ शास्तवो चन्द्रसूर्यौच त्रिमूर्त्तिंचो त्तरंगके। उदुंबरे स्थितं ब्रह्मन्विनावर्धचन्द्रके॥
७४॥ कोलिकायांधराधारं छिनिंचोत्तारपट्टके। स्तंभेषु पर्वतांश्चैव माकाशंचकरोटके॥७५॥ मध्ये प्रतिष्ठयेद्देवं मकरे जाह्नवींतथा। शि
खरेचोरुशृंगेषु पंच पंच प्रतिष्ठयेत्॥७६॥ ब्रह्मा विष्णुस्तथारुद्रईश्वरश्च सदाशिवः। शिखरे वैश्वरं देवं शिरायांतं सुरार्चितं॥७७॥
ग्रीवायां मन्मथं देवमंडकेच निशाकरं। पद्माद्यं पद्मपत्रेच कलशेच सदाशिवं॥७८॥ सद्यो वामस्तथा घोरस्तत्पुरुषईशानंच। कर्ण
दिगर्भपर्यन्तं पंचांगे तान् प्रतिष्ठयेत्॥७९॥ प्रेक्षमं देवतादृष्टे दर्शयेद्धान्यपर्वतं। विप्रं कुमारिकां वस्तु ततोलोकान् प्रदर्शयेत्॥८०॥
उत्सवंच ततः कुर्यात् सूत्रधारस्य पूजनं। वस्त्रालंकारैर्भूरिभोगैर्महिषैरश्ववाहनैः॥८१॥ अन्येषां शिल्पिनां पूजा कर्त्तव्या कर्मिका
रिणां। स्वाधिकारानुसारेण वस्त्रतांबूलभोजनैः॥८२॥ काष्ठपाषाणनिर्माणकारिणो यत्रमंदिरे। भुंजते तत्र भुंक्तेऽसौ शंकर
स्त्रिदशैः सह॥८३॥ पुण्यं प्रासादजं स्वामी प्राप्नोयेत् सूत्रधारतः। सूत्रधारो वदेत् स्वामिन्नहंयं भवतात्तव॥८४॥ आचार्यं पूजनं कृत्वा
वस्त्रस्वर्णधनैः सह। दानं दद्यात् द्विजातिभ्यो दीनान्धदुर्बलेषुच॥८५॥ सर्वेषांधनमाधारः प्राणिनांजीवनंपरं। वित्ते हृते प्रतुष्यंति
मानुषाः पितरः सुराः॥८६॥ प्रतिष्ठाबीतरागस्य जिनशासनमार्गतः। नवकार सूरिमंत्रैः सिद्धकेवलभाषितैः॥८७॥ ग्रहः सर्वज्ञदेवस्य
पादपीठे प्रतिष्ठिताः। येनानंतविभेदेन मुक्तिमार्गउदाहृतः॥८८॥ जिनानां मातरो यक्षो यक्षिणी गौतमादयः। सिद्धाः कालत्रयेजाता
श्चतुर्विंशतिमूर्त्तयः॥८९॥ इतिस्थाप्या जिनावासे त्रिप्रकारं गृहंतथा। सामंतशिखरं नहि सस्राद्यष्टापदादिकं॥९०॥ प्रासादो
नीतरागस्य पुरमध्येसुखावहः। नृणां कल्याणकारी स्याच्चतुर्वर्ग प्रकल्पयेत्॥९१॥ माघादिपंचमासे शुक्लापक्षे कुजादिने। संस्कृतिः तडा
गस्यचतुर्मास्ये कुर्मादाषाढमार्गयोः॥९२॥ असंस्कृतंजलं देवाः पितरोन पिबंतिते। संस्कृते तृप्तिमायांति तस्मात्संस्कारमाचरेत्॥९३॥
जीवनं वृक्षजंतूनां यः करोति जलाशयं। दत्तेवा सलभेन्मोक्षं उर्वी स्वर्गेच मानवः॥९४॥ पुरान्धकवधे रुद्रललाटात् पतितंहितौ। स्वेद
स्तस्मात् समुत्पन्नं भूतमत्यन्तदुःसहं॥९५॥ गृहीत्वा सहसादेवैर्न्यस्ते भूमावधोमुखं। जानुनी कोणयोः पादौ रक्षोदिशि शिवेशिरः॥
९६॥ चत्वारिंशद्धुताशंच वास्तुदेहे स्थिताः सुराः। देव्योऽष्टौनाह्यगास्तिस्रो वसनाद्वास्तु रुच्यते॥९७॥ अधोमुखेन विनतैस्त्रिदशै
र्विदितोबलिः। तेनैवबलिना शांतिं कुरुते नित्यमन्यथा॥९८॥ प्रासादभुवनादीनां प्रारंभे परिवर्त्तने। वास्तुकर्मसु सर्वेषु पूजितः
सौख्यदो भवेत्॥९९॥ एकपादादितो वास्तु यावत्पादसहस्रकं। द्वात्रिंशन्मंडलानिस्युः क्षेत्रतुल्याकृतीनिच॥१००॥ एकाशीतिपदो वास्तुः

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

चतुःषष्टि पदोऽथवा। सर्ववास्तु विभागेषु पूजयेन्मंडलद्वयं॥२०१॥ ईशो मूर्धनि पर्जन्ये दक्षिणं करमाश्रितः। जयस्कंधे महेन्द्राद्याः पंच
दक्षिणबाहुगाः॥२०२॥ महेन्द्रादित्यसत्याश्च भृशआकाशमेवच। वह्निर्भानुनि पूषाद्याः सपृपादतलीस्थिताः॥२०३॥ पूषाभवितथश्चैवगृह
क्षतोयमसंज्ञथा। गंधर्वो भृंगराजश्च मृगः सप्तसुराइति॥२०४॥ पादयोः पितरस्तस्मात्सप्तपादतलास्थिताः। दौवारिकोऽथसुग्रीवःपुष्प
दन्तोजयाधिपाः॥२०५॥ असुरः शोषो यक्ष्मा च रोगोजानुनि संस्थिताः। नागो मुख्यश्च भल्लाटः सोमो गिरिश्चबाहुगाः॥२०६॥ अदितिःस्कंध
देशेच वामेकर्णे दितिःस्थिता। द्वात्रिंशद्देवताःपंक्त्या देवानाभिपृष्ठतस्तथा॥२०७॥ अर्यमा दक्षिणेवामे स्तनेषु पृथिवीधरः। विवस्वानथ
मित्रश्च दक्षवामोरुगावुभौ॥२०८॥ आपस्तुगलकेवास्तोरापवत्सोहृदिस्थितः। सावित्रं सविता तद्वत् करंदक्षिणमाश्रितौ॥२०९॥
इन्द्रइंद्रजयौ मेढ्रे रुद्रोसौ वामहस्तके। रुद्रदासोपितत्रैव इतिदेवमयंबधुः॥२१०॥ ईशानेचरुकीबाह्ये पितृपितृदासश्चपूर्वतः। विदा
रिकाग्निकोणेच जंभा याम्यदिगाश्रिता॥२११॥ नैर्ऋते पूतना स्कन्दः पश्चिमे वायुकोणके। पापराक्षसिकासौम्ये यामेदेवं सम
र्चयेत्॥२१२॥ देवीकूरान् यमादींश्च माषान्नैः सुरयामिश्रे। अपरान् घृतपक्वान्नैः सर्वान् स्वर्णे सुगन्धिभिः॥२१३॥ एकेनशास्त्रिण
गुणाधिकेन विनाद्वितीयेन पदार्थसिद्धिः। तस्मात् प्रकारान्तरतो विलोक्य मणिगुरुणस्थपि सहायकांक्षी॥२१४॥ श्रीविश्वकर्म
गण नाथमहेशचरणौ श्रीविश्वरूपंजगदीश्वरंसुप्रसन्न। प्रासादमंडनमिदंरुचिरंचकार श्रीमंडनो गुणवतो सुवि सूत्रधारः॥२१५॥
इति सूत्रधार मंडन विरचित वास्तुशास्त्र प्रासादमंडने अष्टमोऽध्यायः॥८॥ श्रीः॥ समाप्तो ग्रन्थः५०॥ ॥ ॥